श्रीमते रामानुजाय नमः

**श्रीमते रामानुजाय नमः**

**श्रीमद् वरवर मुनये नमः**

**श्रीमद् वानमहाचल गुरुभ्यो नमः**

# ॥ श्रीतोताद्रिनाथ मङ्गलाशासनं॥

विष्णुचित्त मुनीन्द्रस्य विमलाङ्घ्रियुगे नतिं।
विधाय देवदेवस्य विदधे मङ्गलावळिं॥ १

श्रीदेवि भूमिसेव्याय दिनकृच्चन्द्रभासिने।
देवीयुग्मोपवीज्याय देवदेवाय मङ्गलं॥ २

मार्कण्डेयेन भृगुणा सेनान्या च गरुत्मता।
वन्द्याय सततं वानमहाशैलाय मङ्गलं॥ ३

शेषतल्पनिषण्णाय शेषभूतखिलात्मने।
शेषिताश्रितदोषाय शेषिणे मम मङ्गलं॥ ४

श्रीवैकुण्ठविमानाग्र्ये श्रीपङ्काब्जसरस्तटे।
स्वयं व्यक्ताय मेदिन्यां सुरनाथाय मङ्गलं॥ ५

प्रयोगचक्रहस्ताय प्रणताभयदायिने।
प्रसन्नवदनाब्जाय प्रफुल्लाक्षाय मङ्गलं॥ ६

अङ्कविन्यस्तसव्यश्री हस्तेनाश्रयणोन्मुखान्।
आरोपयितुमुत्सङ्गं आदृतायेव मङ्गलं॥ ७

श्रीमते रामानुजाय नमः

प्रीतिपुष्करिणीरूप लक्ष्मीकौस्तुभवक्षसे।
प्रलम्बकुण्डलानृष्ट वनमालाय मङ्गलं॥ ८

प्रकाशाय प्रथमतः प्रियरोमशयोगिनः।
प्रमग्नोद्धरणाद् भूमेः प्रियकाराय मङ्गलं॥ ९

नैमिशारण्यवासानां व्रतिनां प्रीतिहेतवे।
भौमदेवसुतार्तिघ्ने भव्यरूपाय मङ्गलं॥ १०

पङ्कपद्मसरस्नातां सङ्कल्पफलयिष्णवे।
किङ्करीकृतलोकाय पङ्कजाक्षाय मङ्गलं॥ ११

वैनतेयानुरोधेन वैखानसमुनिं गुरुं।
नियुज्य निजपूजायां नित्यहृष्टाय मङ्गलं॥ १२

गुणशीलस्य राजर्षेः शुनो रूपेण शोचतः।
विनोदिताग्रयशापाय व्योमाद्रीशाय मङ्गलं॥ १३

पद्मतीर्थतटीतप्यत् पद्मापाणिगृहीतये।
पद्मजन्मप्रगीताय पद्मनाभाय मङ्गलं॥ १४

शठकोपशरण्याय सर्वदेवान्तरात्मने।
सहस्रगीतिसाराय सुपर्वेशाय मङ्गलं॥ १५

वानाद्रियोगिना नित्यं वरमङ्कारमामुदे।
ननोपचारसेव्याय मानातीताय मङ्गलं॥ १६

श्रीमते रामानुजाय नमः

सर्वोत्सवसमाजेषु शताधिकसुवैष्णवैः।
चतुस्सहस्रीगाधाभिः शम्स्यमानाय मङ्गलं॥ १७

फाल्गुनोत्तरफल्गुन्योश्चैत्रे चाहनि रौहिणे।
तीर्थान्तादि महद्वन्द्व सेवनीयाय मङ्गलं॥ १८

भट्टनाथयतीन्द्रेण भक्तिभावितगोरथे।
भव्यदेन्दिरया साकं भासमानाय मङ्गलं॥ १९

स्वर्णशैलसमानाभे पुण्यकोटिविमानके।
कलिजिद्योगिन्सङ्कृप्ते कान्ताहृष्टाय मङ्गलं॥ २०

सहकारवनाभोगे सह देव्या विहारिणे।
वसन्तऋतुयात्रायां वानाद्रीशाय मङ्गलं॥ २१

व्याख्यातोभयवेदान्ते वानाचलमठे मुदा।
वैष्णवाराधनान्नित्यं वर्धमानाय मङ्गलं॥ २२

श्रीभूमिगोदादेवीभिः साकं श्रिवरमङ्कया।
दिव्यसिम्हासनस्थाय देवनाथाय मङ्गलं॥ २३

तोदाद्रिनाथसान्निध्ये गोपालार्यनिवेदितं।
मङ्गलं पठितॄणां श्रीवरमङ्का प्रसीदतु॥

**॥ इति श्रीतोदाद्रिनाथ मङ्गलाशासनं सम्पूर्णं॥**